अनुक्रमांकः ....................................
निरीक्षकस्य हस्ताक्षरम् ...........................

**Paper Code**
**MV-101**

# पतञ्जलिविश्वविद्यालयः

## परीक्षा – दिसम्बरमासः – 2018

### एम.ए. संस्कृत-व्याकरणम्, (सत्रम् : प्रथमसत्रम)
### प्रथमपत्रम् – संस्कृतव्याकरणम् (क)

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

---

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' 'घ' इत्याख्येषु चतुष खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

**खण्डः क**
**(दीर्घोत्तरीयप्रश्नाः)**

**निर्देशः** पृष्टेषु चतुर्षु द्वौ द्वीर्घप्रश्नौ समाधेयौ । **(2×15=30)**

1. शब्दस्वरूपं शङ्कासमाधानपुरस्सरं विविच्यताम्।
2. 'सिद्धे शब्दार्थसम्बन्धे' इत्यत्र सिद्धशब्दस्य कः पदार्थः?
3. 'तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनणत्वात्' इतिवार्तिकं दोषनिराकरणपूर्वकं व्याख्यायताम्।
4. 'वर्णैकदेशा वर्णग्रहणेन' गृह्यन्ते चेत् के दोषाः ?

**खण्डः ख**
**(लघूत्तरीयप्रश्नाः)**

**निर्देशः** पृष्टेषु सप्तसु चत्वारो लघुप्रश्नाः समाधेयाः। **(4×5=20)**

1. 'किमर्थमुपदिश्यते' इतिवार्तिकांशस्य व्याख्यानङ्कुर्वन्तु।
2. अण्ग्रहणेषु संदेहापकरणं कथम्?
3. अयोगवाहानामविशेषेणोपदेशे किं प्रयोजनम्?
4. संध्यक्षरेषु तपरोपदेशे के दोषाः?
5. किमर्थो वर्णानामुपदेशः?
6. कथं पुनर्ज्ञायते – सिद्धः शब्दोऽर्थः सम्बन्धश्चेति?
7. 'चत्वारि शृङ्गाः इतिमन्त्राभिप्रायं बोधयन्तु।

**खण्डः ग**
**(अतिलघूत्तरीयाः प्रश्नाः)**

**निर्देशः** पृष्टेषु त्रयोदशसु दश अतिलघुप्रश्नाः समाधेयाः। **(01×10=10)**

1. 'दुष्टः शब्दः स्वरतो' इत्यत्र 'स्वरतः' इति कः प्रत्ययः, कस्मिन्नर्थे?
2. जातेः लक्षणं किम्?
3. वर्णविकारस्यासोदाहरणं किम्?
4. अवाग्योगविदित्यस्य कोऽभिप्रायः?
5. 'विसस्रे' इतिशब्दस्य कोऽर्थः?

6. 'धर्मनियमः' इत्यत्र कतिधा समासः?
7. 'अस्त्यप्रयुक्तः' इत्यत्र कानि उदाहरणानि?
8. सूत्रव्याख्याने किं किमन्तर्निहितं भवति?
9. तृप्नोतिग्रहणेन किं ज्ञाप्यते?
10. अक्षरशब्दे कः प्रत्ययः?
11. प्रत्याहारऽनुबन्धानामज्ग्रहणेन ग्रहणे को दोषः?
12. कतिविधप्रकारैर्विद्योपयुक्ता भवति?

## खण्डः घ
## (वस्तुनिष्ठप्रश्नाः)

**निर्देशः** पृष्टा वस्तुनिष्ठप्रश्नाः समाधेयाः। **(01×10=10)**

1. 'अथ शब्दानुशासनम्' इत्यत्र 'अथ' शब्दः ..........................
   (अ) मङ्गलार्थः (ब) अधिकारार्थः
   (स) प्रश्नरार्थः (द) अनन्तरार्थः
2. गौरित्यत्र कः शब्दः ?
   (अ) दव्यम् (ब) आकृतिः
   (स) ध्वनिः (द) गुणः
3. व्याकरणशास्त्रस्य कति प्रयोजनानि ?
   (अ) पञ्च (ब) षट्
   (स) सप्त (द) अष्ट
4. 'सक्तुः' इन्यत्र को धातुः ?
   (अ) षच सेचने (ब) कस
   (स) उभौ (द) उभावपि न
5. "व्याकरणम्" इत्यत्र प्रत्ययः कस्मिन् कारकेऽस्ति ?
   (अ) कर्मणि (ब) कर्त्तरि
   (स) करणे (द) कर्मकर्त्तरि
6. 'अवात्त' एतत् रूपं कस्य लकारस्यास्ति ?
   (अ) लृङ् (ब) लुङ्
   (स) लङ् (द) लट्
7. वर्णानां विषये किं तथ्यम् ?
   (अ) सार्थकाः (ब) अनर्थकाः
   (स) उभयविधाः (द) न उभयविधाः
8. 'ओ३पगव' इत्युदाहरणं कस्य वार्तिकस्यास्ति ...................................
   (अ) प्लुत्यादिष्वज्विधिः (ब) प्लुतसंज्ञा च
   (स) उभयम् (द) उभयमपि
9. वर्णैकदेशा वर्णगहणेन ...........................................................................
   (अ) गृह्यन्ते (ब) न गृह्यन्ते
   (स) गृह्यन्ते नापिगृह्यन्ते च (द) किमपि न
10. 'यवः' 'लव' इत्यत्रः कः प्रत्ययः ?
   (अ) अच् (ब) अप्
   (स) अण् (द) अञ्

--------------x--------------